| English | Sanskrit |
|---|---|
| THE CORE OF TEACHING | केन्द्रभूतं प्रबोधनम् |
| The core of Krishnamurti's teaching is contained in the statement he made in 1929 when he said *Truth is a pathless land*. | कृष्णमूर्तेः केन्द्रभूतं प्रबोधनं तस्य तद्-वाक्ये निक्षिप्तं यत् स उक्तवान् 1929-तमे* (क्रैस्तोत्तर) संवत्सरे । स तदा उवाच - सत्यम् एका मार्गहीना भूमिर्भवति - इति । |
| Man cannot come to it through any organization, through any creed, through any dogma, priest or ritual, not through any philosophical knowledge or psychological technique. | नरः केनापि संघटनद्वारा तत् सत्यं प्राप्तुं न शक्नोति । न केनापि मतविशेषद्वारा, सिद्धांत-द्वारा, अर्चक-मूलकं, धार्मिककर्म-द्वारा, दार्शनिकज्ञानेन, मनोवैज्ञानिक-तंत्रेण वा । |
| He has to find it through the mirror of relationship, through the understanding of the contents of his own mind, through observation and not through intellectual analysis or introspective dissection. | स तत् प्राप्नुयात् संबंधानां दर्पणे, स्वस्य एव मनसि अन्तर्निहितस्य अवगमने, अवलोकनद्वारा च । न तत् प्रापणीयं बौद्धिकविश्लेषणद्वारा अन्तर्मुख-व्यवच्छेदेन वा । |
| Man has built in himself images as a fence of security—religious, political, personal. | नरः स्वस्मिन् अन्तः अनेकान् स्व-प्रतिबिंबानि (मानस-चित्राणि) कल्पितवान् ये भवन्ति तस्य सुरक्षा-प्राकारः । अस्तु सा सुरक्षा धार्मिका, राजनैतिका, वैयक्तिका वा । |
| These manifest as symbols, ideas, beliefs. | एतानि तस्य संकेतेषु, धारणासु, विश्वासेषु च प्रकटीभवन्ति । |
| The burden of these images dominates man's thinking, his relationships, and his daily life. | दृश्यते एतेषां प्रतिबिंबानां प्रभावः नरस्य विचार-रीतिषु, संबंधेषु, दैनिकजीवनशैल्यां च । |
| These images are the causes of our problems for they divide man from man. | एतानि चित्राणि अस्माकं समस्यानां कारणानि भवन्ति, यस्मात् नरेषु मध्ये विभजनं तेषामेव कार्यम् । |
| His perception of life is shaped by the concepts already established in his mind. | याः कल्पनाः नरस्य मनसि सुप्रतिष्ठिताः सन्ति, तासामनुरूपा जीवनं प्रति तस्य दृष्टिः भवति । |
| The content of his consciousness is his entire existence. | तस्य प्रज्ञाने निहितः सर्वो विषयः तस्य समग्रस्य अस्तित्वात् न भिन्नः । |
| The individuality is the name, the form and superficial culture he acquires from tradition and environment. | तस्य परंपरातः परिसरतश्च यद् नाम च यद् रूपं च या उपरितल-संस्कृतिश्च |

| | |
|---|---|
| | उपार्जिताः भवन्ति, ताः एव तस्य विशिष्ट-व्यक्तित्व-रूपेण परिणमन्ते । |
| The uniqueness of man does not lie in the superficial but in complete freedom from the content of his consciousness, which is common to all humanity. | न भवति उपरितलेषु अंशेषु नरस्य विलक्षणता । भवति सा स्वप्रज्ञायां निहितात् सर्वस्मात् विषयात् तस्य स्वातंत्र्ये । सामान्यो भवति स प्रज्ञा-निहित-विषयः सर्वेषु मानवेषु । |
| So he is not an individual. | तस्मात् न कोऽपि नरः (पृथक्कृतो) व्यक्तिः । |
| Freedom is not a reaction; freedom is not choice. | स्वातंत्र्यं कापि प्रतिक्रिया न भवति, न च कोऽपि विकल्पः । |
| It is man's pretence that because he has choice he is free. | व्याजो भवेत् नरस्य तत् चिंतनं यत्र विकल्पेषु सत्सु स आत्मानं स्वतंत्रं मन्यते । |
| Freedom is pure observation without direction, without fear of punishment and reward. | स्वातंत्र्यं तदा भवति यदा शुद्धं दिशाशून्यमवेक्षणं स्यात् , यत्र दंड-पारितोषिक-व्यवस्थायाः भयं न स्यात् । |
| Freedom is without motive; freedom is not at the end of the evolution of man but lies in the first step of his existence. | स्वातंत्र्ये कापि प्रयोजन-परिभावना न वर्तते । नरस्य विकसनस्यान्ते न भवति स्वातन्त्र्यं परंतु तस्य अस्तित्वस्य प्रथमे पदे तदवर्तते । |
| In observation one begins to discover the lack of freedom. | अवलोकने वयं स्वातन्त्र्यस्य अभावम् आविष्कर्तुं प्रारभामहे । |
| Freedom is found in the choiceless awareness of our daily existence and activity. | अस्माकं दैनिक-जीवनस्य, दैनन्दिन-क्रिया-कलापानां च विकल्प-रहितायां वरण-वर्जितायां प्रज्ञायां स्वातन्त्र्यमाविष्क्रियते । |
| Thought is time. | विचारः समयो भवति । |
| Thought is born of experience and knowledge, which are inseparable from time and the past. | विचारो जायते अनुभवात् ज्ञान-संग्रहाच्च ।<br>एतयोः - अनुभव-ज्ञानसंग्रहयोः - समयाच्च अतीतात् च पृथक्करणं न संभवति । |
| Time is the psychological enemy of man. | समयो भवति नरस्य मनोवैज्ञानिकः शत्रुः । |
| Our action is based on knowledge and therefore time, so man is always a slave to the past. | सर्वदा नरः अतीतस्य दासो भवति यस्मात् ज्ञान-संग्रहः अस्माकं सर्वासां क्रियाणाम् आधारो दृश्यते । तस्मात् |

| | |
|---|---|
| | कारणात् समयश्च अस्माकं सर्वासां क्रियाणाम् आधारो जायते । |
| Thought is ever limited and so we live in constant conflict and struggle. | विचारः सर्वदा सान्तो (न अनन्तो) वर्तते, तस्माद् वयं जीवामः सतत-संघर्षे, महायत्ने च । |
| There is no psychological evolution. | मनोवैज्ञानिक-विकासो नाम न भवति एव । |
| When man becomes aware of the movement of his own thoughts, he will see the division between the thinker and thought, the observer and the observed, the experiencer and the experience. | स्वस्य विचाराणां गतेः प्रज्ञा नरस्य यदा जायते, तदा स विचार-विचारकयोर्मध्ये विभागं द्रष्टुं शक्नोति । स भवति क्षमः, अवेक्षित-अवेक्षकयोर्मध्ये स्थितं विभजनं द्रष्टुम् । अनुभवस्य च अनुभव-भोक्तुश्च मध्यवर्तिनीं विभक्तिं च स द्रष्टुं समर्थो भवति । |
| He will discover that this division is an illusion. | एष विभागो भ्रान्तिरिति सोऽनुद्रक्ष्यति। |
| Then only is there pure observation which is insight without any shadow of the past or of time. | तदा एव भवति शुद्धमवेक्षणं, यदेका अन्तर्दृष्टिः यत्र छायामात्रमपि न स्याद् अतीतस्य समयस्य वा । |
| This timeless insight brings about a deep, radical mutation in the mind. | असौ समय-वर्जिता अन्तर्दृष्टिः अगाधं समूलं च अन्यथाभावं घटयति । |
| | |
| Total negation is the essence of the positive. | समग्रा व्यावृत्तिः धनात्मकस्य सारो भवति । |
| When there is negation of all those things that thought has brought about psychologically, only then is there love, which is compassion and intelligence. | विचारेण मनोवैज्ञानिक-रूपेण घटितस्य सर्वस्य अर्थजातस्य व्यपोहो यदा भवति, तदा एव प्रेम्णः आविर्भावः, यत् करुणा बुद्धिमत्ता च । |
| - | * एकोनत्रिंशत्-उत्तर-एकोनविंशत्-शततमे<br>- |
| *Copyright ©1980 Krishnamurti Foundation Trust Ltd.* | ॥ कृति-स्वाम्यम् - -<br>कृष्णमूर्ति-प्रतिष्ठान-न्यासः परिमितः॥ |